"यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रय" इति। अत्र त्रिभ्योऽन्यूनाः सभ्येभ्योऽधिकाश्च न कार्य्या इत्यत्र तात्पर्य्यं सङ्ख्यावैषम्यन्तु "भूयोऽल्पविरोधे भूयसां स्यात् सधर्म्मकत्वमिति न्यायेन विप्रतिपत्तावधिकसङ्ख्यावचनमादरणीयं गुणसाम्यैः। तद्वैषम्ये तु शतमप्यन्धानान्न पश्यतीति न्यायेन गुणवत्तरवचनमेवेति प्रदर्शनार्थम्। "यत्तु चत्वारो धर्म्मज्ञाः पर्षत्त्रैविद्यमेव वा। सा ब्रूते यं स धर्म्मः स्यादेको वाऽध्यात्मवित्तमः" इति योगीश्वरेण विषमसङ्ख्यत्वमपि बहुत्वमपि चानादृतम्। तत्तु पूर्वोक्तानां धर्म्मकारकज्ञापकहेतूनां सन्देहनिर्णयविषयं प्रक्रमात्। व्यवहारविषये तु त्र्यवराणां विषमसङ्ख्यानामेव सभ्यत्वं विशेषविधानादित्यवसेयम्। एते च ब्राह्मणा एव। मनुबृहस्पतिभ्यां विप्रपदोपादानात्। स तु सभ्यैः स्थिरैर्युक्तः प्राज्ञैर्मौलैर्द्विजोत्तमैः। धर्म्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैरिति" द्विजोत्तमपदस्य च कात्यायनेनोपादानात्। नारदेन "राजा तु धार्म्मिकान् सभ्यान्नियुञ्ज्यात् सुपरीक्षितान्। व्यवहारधुरं वोढुं ये शक्ताः पुङ्गवा इव। धर्म्मशास्त्रेषु कुशलाः कुलीनाः सत्यवादिनः। समाः शत्रौ च मित्रे च नृपतेः स्युः सभासदः" इति। विचार्य्य श्रेणिभिः कार्य्यं कुलैर्यन्न विचारितम्। गणैश्च श्रेण्यविख्यातं गणाज्ञातं नियुक्तकैः। कुलादिभ्योऽधिकाः सभ्यास्तेभ्योऽध्यक्षोऽधिकः कृतः। सर्वेषामधिको राजा धर्म्म्यं यत्नेन निश्चितम्। उत्तमाधममध्यानां विवादानां विचारणात्। उपर्य्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः" वर्णभेदोऽनादृतः।

शुक्रनीतिपरिशिष्टेऽपि तथैवोक्तं यथा

"यद्वर्णजो भवेद्राजा योज्यस्तद्वर्णजः सदा। तद्वर्णा एव गुणिनः प्रायशः सम्भवन्ति हि। व्यवहारविदः प्राज्ञा वृत्तशीलगुणान्विताः। रिपौ मित्रे समा ये च धर्म्मज्ञाः सत्यवादिनः। निरालसा जितक्रोधकामलोभाः प्रियंवदाः। राज्ञा ते च नियोक्तव्याः स्युः सभ्याः सर्वजातिषु" "राजा तु धार्म्मिकान् सभ्यान् नियुञ्ज्यात् सुपरीक्षितान्। व्यवहारधुरं वोढुं ये शक्ताः पुङ्गवा इव। लोकवेदज्ञधर्म्मज्ञाः सप्त पञ्च त्रयोऽपि वा। यत्रोपविष्टा विप्राः स्युः सा यज्ञसदृशी सभा। श्रोतारो वणिजस्तत्र कर्त्तव्याः सुविचक्षणाः। अनियुक्तो नियुक्तो वा धर्म्मज्ञो वक्तुमर्हति। एकः शास्त्रमधीयानो विन्द्यान्न कार्य्यनिर्णयम्। तस्माद्बह्वागमः कार्य्यो विवादेषूत्तमो नृपैः। स ब्रूते यं स धर्म्मः स्यादेको वाध्यात्मचिन्तकः। एकद्वित्रिचतुर्वारं व्यवहारानुचिन्तनम्। कार्य्यं पृथक् पृथक् सभ्यै राज्ञा श्रेष्ठाक्षरैः सह। अर्थिप्रत्यर्थिनौ सभ्यान् लेखकप्रेक्षकांश्च यः। धर्म्मवाक्यै रञ्जयति स सभास्तारतामियात्। नृपोऽधिकृतसभ्याश्च स्मृतिगणकलेखकौ। हेमाग्न्यम्बु स्वं पुरुषः साधनाङ्गानि वै दश। एतद्दशाङ्गकरणं यस्यामध्यास्य पार्थिवः। न्यायान् पश्येत् कृतमतिः सा सभाऽध्वरसन्निभा"।

**सभापति** पु० ६त०। सभायाः स्थापके नृपे "सभापतिश्च नृपतिरेव "दुर्गमध्ये गृहं कुर्य्यादित्यादिना बृहस्पत्यादिभिः सभानिर्माणतद्गुणादेस्तत्र सभ्योपवेशनादेश्च तत्कर्त्तृत्वेव विधानात्" वीरमि०।

**सभास्तार** पु० सभां स्तृणाति स्तृ—अण्। १सभ्ये अमरः। "अर्थिप्रत्यर्थिनौ सभ्यान् लेखकप्रेक्षकांश्च यः। धर्म्मवाक्यै रञ्जयति स सभास्तारतामियात्" शुक्रनीतिपरि० उक्ते २सभ्यभेदे च। [कारके अमरः।

**सभिक** पु० सभा द्यूतसभा आश्रयत्वेनास्त्यस्य ठन्। द्यूत-

**सभीक** पु० सभा द्यूतं प्रयोजनमस्य ईकन्। द्यूतकारे शब्दच०

**सभोचित** पु० सभा उचिता परिचिता यस्य। १पण्डिते धनञ्जयः। २सभायोग्ये त्रि०। [१विज्ञे त्रि० जटा०

**सभ्य** पु० सभायां साधुः यत्। १सामाजिके २द्यूतकारे च

**सम्** अव्य० सो—बा० कमु। १सम्यगर्थे २प्रकर्षे ३सङ्गतौ ४शोभने शब्दच०। ५समुच्चये हेमच०।

**सम** त्रि० सम—अच्। १समाने तुल्ये २सर्वे अमरः ३साधौ मेदि०। (योड़) ४युग्मे "समेऽङ्कितेवर्गः" इति लीला० समतयाख्यातेषु द्वितीयचतुर्थषष्ठादिषु ५राशिषु च। अतुल्येऽस्य सर्वनामता। गीतवाद्ययोरेककालभवे गायकहस्तादिचालनरूपे ६तालभेदे न० ७शत्रुमित्रभिन्ने ग्रहे प्रकृत्या० अभेदे तृतीया। समेन याति समं यातीत्यर्थः।

**समक्ष** अव्य० अक्ष्णः समीपम् अव्ययी० अच्। १चक्षुःसन्निकर्षे तदस्त्यस्मिन् अच्। २प्रत्यक्षविषये त्रि०।

**समकोण** त्रि० समः कोणो यस्य। रेखागणितोक्ते समकोणयुक्ते त्रिकोणादौ। क्षेत्रशब्दे २३९० पृ० १५ अङ्कचिह्निते दृश्यम्।

**समकोल** पुंस्त्री० ६ब०। सर्पे त्रिका०। स्त्रियां ङीष्।

**समगन्धक** पु० समास्तुल्यभागेन निवेशितागन्धाः गन्धयुक्तद्रव्याण्यत्र कप्। कल्पितधूपभेदे शब्दमा०।

**समगन्धिक** पु० समः सर्वदा तुल्यरूपः गन्धोऽस्त्यस्य ठन्।